Narasimhamangalam

# નરસિંહમઙ્ગલમ્

## Document Information

Text title : Narasimhamangalam

File name : narasiMhamangalam.itx

Category : vishhnu, dashAvatAra, mangala

Location : doc_vishhnu

Author : araiyaradAsa

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# નરસિંહમઙ્ગલમ્

(મેલુકોટે ગિરિનૃસિંહ વિષયકં વર્ણનમ્)
સદ્યઃ સુજાત નરસિંહ વિભો ગિરિષ્ઠ
પ્રહ્લાદભક્તકૃત્ કાર્તયુગપ્રતિષ્ઠ ।
સેવાકુતૂહલિ જનૈઃ સતતં ઘનિષ્ઠ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧॥

ગોમન્તપર્વતનિવાસિનિ સિંહરાજે
સાયન્દિનાર્ચન દિદૃક્ષુરયં હિ લોકઃ ।
સોપાનપઙ્ક્તિમધિરુહ્ય સુખં સુહૃષ્ટઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨॥

શૈલાધિરોહણપથે ફલકાઃ શિલાનાં
શ્રીનારિકેલફલઙ્ઘટ્ટન તોયચિન્હાઃ ।
સ્વાદૂદકૈઃ સુખસુશીતલ માર્દવાઘાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩॥

પથ્યાસતે સુમતમાલવટપ્રચમ્પાઃ
ચામ્રાસ્તથા પનસનિમ્બસુપાટલાદ્યાઃ ।
છાયાપ્રદઃ સુદૃઢભૂરુહષણ્ડમાલાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪॥

ભેતાલિકાદિ ઘનભૂતપિશાચવિષ્ટાઃ
ચિત્રીકૃતાઃ પથિકભક્તપદારવિન્દમ્ ।
પ્રાપ્યૈવ મુક્તિમહહા નિયતાં લભન્તે
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૫॥

વૃન્દાવનં તદિદમસ્તિ શઠારિરમ્યં
લક્ષ્મીસનાથમથવાપિ સવાસુદેવમ્ ।
રામાનુજાર્ય પદવી વપુષા ચ રમ્યં

સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૬॥

સ્તમ્ભાઽઽઢ્યમણ્ટપગણા બલદાઃ હનૂમત્
સાકારમૂર્તય અહોઽત્ર વિવર્તસિંહૌ ।
સ્વાદૂદકં બહુશિલાગહનં સરશ્ચ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૭॥

ભટ્ટારકં શ્રુતિવિરૂપમમું સુબાલાઃ
આરોહણાર્થ પથ એવમહોવદન્તિ ।
આરોહયેમ બધિરાદિપતે ગિરીન્દ્રં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૮॥

હાર્દાં ગતિં પ્રિયહિતાનિલક્લૃપ્તધાટીં
પ્રાપ્તા જના વિતતદૂરસ્વદૃષ્ટિપાતાઃ ।
ભૂગોલમેવ ખલુ સાનુભવં ભજન્તે
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૯॥

ગોપાશ્ચરન્તિ ચ સુચારુ ચ ચારયન્તિ
ગાયન્તિ ચાઽત્ર સુસુખં ત્વજગોગણાન્સ્વાન્ ।
સર્પન્તિ સર્પનિવહાસ્ત્વથ ભીતિદૂરાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૦॥

દૂરાત્ સમસ્તજનતા તવ ગોપુરાગ્રં
દૃષ્ટ્વૈવ શાન્તમનસસ્ત્વથ ભક્તિભાજઃ ।
તત્રૈવ તત્ર નમનં બહુધા ચરન્તિ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૧॥

કાર્તીકમાસિ તવ ગોપુરદીપસેવા
ભક્તાગ્રગણ્યવિહિતા જનમાનસં ચ ।
ત્વદ્ દાસ્યદીપિતમધાત્ તવ માનસં ચ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૨॥

રાજાગિરેરવતિ નઃ પરમઃ પુમાન્ વૈ
શ્રીનારસિંહવપુરત્ર રમાસખો યઃ ।
તસ્યેદમસ્તિ સકલં ત્વિતિ લોકભાષા
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૩॥

સન્ધ્યાસુરાગ અથમત્ર ન સાન્ધ્યરાગઃ
હૈરણ્ય દેહ હનનાદથ રક્તપાતઃ ।
વ્યાપ્નોતિ ખં ત્વિતિ શઠારિમુનેર્હિ સૂક્તિઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૪॥

નીચૈર્ગિરિર્વસતિ ચાઽત્ર તતોપરિ ત્વં
ગિર્યાઢ્યમૂર્તિરહહા કિમિદં તુ યુગ્મમ્ ।
હૈરણ્ય દેહગિરિરેક અથાપિ ચ ત્વં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૫॥

દૂરે ગિરીન્દ્ર શતમાક્ષિતિજં સમન્તાત્
પશ્યન્તિ ચાપિ ચ સુચારુતટાકસઙ્ઘાન્ ।
કાવેરિકાદિ જલભૂરિ સુવાહિનીસ્તાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૬॥

બ્રહ્માનુભૂતિરિયમેવ તવાત્ર સૃષ્ટૌ ।
ચેતો વિશાલસુખભાવમયે લભેત ।
આરોગ્યભાગ્યમપિ સિદ્ધ્યતિ નારસિંહ ।
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૭॥

શ્રીભાષ્યકાર ષઠકોપસુરક્ષિતસ્ત્વં
દ્વારે મહત્યહહ થાવુભયે ચ પાર્શ્વે ।
વસ્ત્રોર્યતન્તુભિરહોઽર્ચિતસિંહડિમ્ભ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૮॥

સોપાનપઙ્ક્તિમિહ વૈ નવસઙ્ખ્યયાઽઽઢ્યાં
તાવદ્ભિરેવ સુફલૈઃ શુભનારિકેલૈઃ ।
આરાધયન્તિ જનતા વિવિધાસ્ત્વદીયાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૧૯॥

પઞ્ચોત્તરત્રિશતષષ્ટિમિતાસ્ત્વદીયાઃ
સોપાનપઙ્ક્તય ઇમા તવનામ સૌખ્યાઃ ।
એકપ્રવત્સરકૃતે કતિચિજ્જનાનાં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૦॥

ભિત્તૌ સુવર્ણફલકાઞ્ચિત સિંહરૂપ
ભદ્રાં દશાઽઽકૃતિમયન્ નયનાભિરામ ।

દ્વારે સમાઽઽગતસમાદરમાતનોષિ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૧॥

વાયવ્યકોણ ઇહ રાજિતપાદયુગ્મં
સિંવત્ પ્રકામકરુણં ગુરુલક્ષ્મણસ્ય ।
આલોકપાત્રમિત એવ સ્વપાદતીર્થં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૨॥

ઊર્ધ્વોર્ધ્વગામિ જનસન્નુતપાદપદ્મ
દેહાત્મરોગપરિહારિ ગુહાસુપદ્મ ।
હૈરણ્યરાક્ષસકુવૃત્તિમિમાં પ્રવિધ્ન
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૩॥

સન્તાપશાન્તિરિતિ કામનયા સમેતાઃ
ચિન્તાવિમુક્તિમરરે પ્રભજન્ત એવ ।
પ્રહ્લાદયસ્ય મિતભાગ્યમતો યતસ્ત્વં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૪॥

એકાર્થમાવિરસિ ભક્તવચશ્ચ સત્યં
કર્તું તદેતદિદમદ્ભુતરૂપમાઽઽધાઃ ।
ક્ષીરં યથા સુઘટિતં શુભશર્કરાઽઽઢ્યં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૫॥

માધ્યાન્હિકો વિધિરયં કિમુયોગસિંહ
પ્રાયો ભવાન્ પ્રતિદિનં નિયતાભિષેકઃ ।
દૂરાત્ સ્વભક્તજનતાઽઽગ્રહયોગ એષઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૬॥

સંક્ષીરશુદ્ધદધિપૂતઘૃતાભિષેચ્ય
શ્રીખણ્ડશર્કરસુતીર્થસુગન્ધ લેપ્ય ।
હારિદ્રચૂર્ણ પરિપૂર્ણ સુખાઙ્ગવેદ્ય
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૭॥

કલ્યાણતીર્થ સુખમજ્જનમર્જિતોઽસિ
ત્વત્સૂક્તિપાઠમુખરીકૃતભૂધરોઽસિ ।
પઞ્ચાસ્ય કેસરસટાબહુભૂષિતોઽસિ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૮॥

નિત્યાભિષેક બહુવેષકુતૂહલાર્હ
બાલાદિકાન્ સ્વપદસેવનમાનનાર્હ ।
મ્લેચ્છાદિરાજસહજાર્પિત ભૂષણાર્હ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૨૯॥

અક્ષ્ણા વિકૂણિત સુવૃત્તશુભેક્ષણોઽસિ
દંષ્ટ્રાસુ સુન્દર મુખોઽસિ ઘનપ્રશાન્ત ।
હસ્તાઙ્ગુલીનખ સુપાદનખપ્રકાશ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૦॥

ભાલપ્રદેશવિલસત્તિલકોઽસિ દેવ
શ્મશ્રુપ્રભાચકિતવીર્યરસોઽસિ દેવ ।
કર્ણાગ્રલોલકચલન્મધુરોઽસિ દેવ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૧॥

મધ્યપ્રદેશ સુવિરાજિતનાગપટ્ટ
હસ્તદ્વયેન સુવિધારિત યોગપટ્ટ ।
પાદદ્વયેન સુવિલોમસુખાર્હ પટ્ટ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૨॥

વૃત્તાભિરામમુકુટાઞ્ચિત દિવ્યમૂર્ધન્
પાર્શ્વે સુપુચ્છ સુખસુન્દર સન્નિવેશિન્ ।
ઊર્ધ્વાગ્ર તત્ કનકરત્નકિરીટધારિન્
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૩॥

માર્જારકાકપિકમૂષકપોતકાનાં
આધારભૂત નરસિંહ સુખાદ્રિદેશ ।
અસ્માદૃશાનપિ ચ પાલય સર્વબન્ધો
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૪॥

નિર્વીર્યં નિષ્ફલફુલફુકુકાર્યમન્દાં
અર્થૈકધાવનનિજશ્રમદૂરગન્ધામ્ ।
વિદ્યાં વિદારય વિભોઽશુભબાલકન્દાં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૫॥

યોગાનૃસિંહ તવગર્જન સખ્યમેતિ

સાહસ્ત્રનામપઠનં શ્રુતિરમ્યમેવ ।
“ટિપ્પૂ” સમર્પિત સુભેરિકયાઽઽસ્નનાદં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૬ ॥

ઘણ્ટાનિનાદશુભસૂચિતં ભોગકાલ
લુણ્ઠાકતાં હરસિ સર્વજને સલીલ ।
સર્વં સમર્પિતમહો કુરુષે સુલીલ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૭ ॥

ભોજ્યાઽઽસનેન રહિતે પરમેહિ ધામ્નિ
ઘણ્ટારવં કથમયે શ્રુણુષે પ્રભો ત્વમ્ ।
ચિઞ્ચાન્નમીદૃશમપીહ ન તત્ર લભ્યં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૮ ॥

ઘણ્ટાવતારગુરુઘોષણસંસ્મૃતિઃ સા
ઘણ્ટાનિનાદત અહો મનસિ પ્રબુદ્ધા ।
ઘણ્ટારવેણ સદસત્પ્રિયભીષણેહા
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૩૯ ॥

ચિત્રાન્નગન્ધ સુરભીકૃત પાણિપાત્રાઃ
મુદ્ગાન્નદધ્યશન શર્કરપાવનાન્નાઃ ।
ધન્યા ભવન્તિ મુહુરેવ સમસ્તભક્તાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૦ ॥

સૂપપ્રધાન કટુકાઽઽમ્લરસાર્કમન્નં
તે શ્રીફલાદિ ચણનિર્મિત વેસવારમ્ ।
ભુક્ત્વા કદાપિ ઘનપાયપેયતુષ્ટાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૧ ॥

દેવસ્ય પાદતલતસ્ત્વધરપ્રદેશે
સ્વર્ગ્યં બિલં વિલસતીહ સુખાત્સુખાર્હમ્ ।
એકત્ર યત્ર પૃથુદેહિ સુકષ્ટરમ્યં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૨ ॥

સર્વેઽપિ સાત્વિકતરા મનસીવ દેહે
સર્વેઽપિ પૂરિતસુખાસ્તવ દર્શનેન ।
સર્વેઽપિ ભાવિતરસાસ્ત્વરોહનિષ્ઠાઃ

સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૩॥

મન્ત્રેષુ સિદ્ધપુરુષાય ઇહ ત્વદીયાઃ
તાપત્રયાऽऽતુરજનાંશ્ચ વિમોચયન્તિ ।
યન્ત્રાऽऽદિના તવહિ વત્સલતા વરેણ્ય
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૪॥

નિત્યં દ્વિવારમથવાऽપિ બહુપ્રવારં
રોહન્તિ તીર્થમપિ કાષ્ઠચયં ચ હવ્યમ્ ।
શીર્ષે વહન્તિ તુલસીં તવ સર્વમેવ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૫॥

તસ્માત્ ખલૂત્તમ સુખાર્હ સુનિદ્રિતાસ્તે
ગેહે ભવન્તિ પુરુષાઃ શિશવશ્ચ નાર્યઃ ।
ત્વચ્છાયયાશ્રિતમુખાદિસમસ્વરૂપાઃ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૬॥

પઞ્ચાપિપાણ્ડવસુતાહ્યવસન્ત યત્ર
ધ્યાનાદિ સત્કૃતિનિકેતન સૌમ્ય દેશાન્ ।
તાં ચાભજન્ત ઘનસાન્દ્રગુહાં તમિસ્રાં
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૭॥

સોપાનપાર્શ્વગત ભૂરુહ આલપન્તઃ
બાલાશ્ચ સઞ્ચિતસુમાસ્તવ દેવદારોઃ ।
સ્વીયાન્ ગૃહાનુપરિતઃ કિલ નિર્દિશતિ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૮॥

પૂર્ણં પ્રમણ્ડલમમું શુભમણ્ડનં તે
યો વૈ તુ મણ્ડલદિનં પરમાર્થભક્ત્યા ।
જપ્તા સુપાઠકૃદત્ર પરત્ર તં ચ
સ્વામિન્ પ્રસીદ નૃહરે યદુશૈલનાથ ॥ ૪૯॥

ઇતિ તિરુનારાયણપુરં અરૈયરદાસસ્ય કૃતિષુ નૃહરિમઙ્ગલં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Narasimhamangalam*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*